विभाषोदरे । (८८/१०१६)

उदरशब्दे उत्तरपदे [1]यत्प्रत्ययान्ते समानस्य विभाषा स इत्ययमादेशो भवति । सोदर्यः, समानोदर्यः । 'समानोदरे शयित ओ चोदात्तः' (४.४.१०८/१६५९) इति [2]यत् ॥

दृग्दृशवतुषु । (८९/१०१७)

दृक् दृश वतु इत्येतेषु परतः समानस्य स इत्ययमादेशो भवति । सदृक् । सदृशः । 'त्यदादिषु दृशोऽनालोचने कञ्च' (३.२.६०/४२९) इत्यत्र 'समानान्ययोश्चेति वक्तव्यम्' (वा. २६१) इति कञ्क्विनौ प्रत्ययौ [3]क्रियेते ।

[७५५] दृक्षे चेति वक्तव्यम् । (म.भा. ३.१७१)

सदृक्षः ।

[७५६] [4]दृशेः क्सप्रत्ययोऽपि तत्रैव वक्तव्यः ।

वतुग्रहणमुत्तरार्थम् ॥

इदं किमोरीश्की । (९०/१०१८)

इदं किम् इत्येतयोरीश् की इत्येतौ यथासङ्ख्यमादेशौ भवतो दृग्दृशवतुषु । ईदृक् । ईदृशः । इयान् । कीदृक् । कीदृशः । कियान् । 'किमिदंभ्यां वो घः' (५.२.४०/१८४१) इति वतुप् ।

[७५७] दृक्षे चेति वक्तव्यम् ।

ईदृक्षः । कीदृक्षः ॥

आ सर्वनाम्नः । (९१/४३०)

सर्वनाम्नः आकारादेशो भवति दृग्दृशवतुषु[5] । तादृक् । तादृशः । तावान् । यादृक् । यादृशः । यावान् ।

[७५८] दृक्षे चेति वक्तव्यम् ।

तादृक्षः । [6]यादृक्षः ।

---

1. यत्प्रत्यये फ. 2. यत्प्रत्ययः ह. 3. विहितौ फ. ह. 4. वार्तिकमिदं नास्ति फ. 5. परतः इत्यधिकम् फ. 6. नास्ति फ.